॥ श्रीः ॥

# ॥ प्रश्नोत्तररत्नमालिका ॥

कः खलु नालङ्क्रियते
दृष्टादृष्टार्थसाधनपटीयान् ।
अमुया कण्ठस्थितया
प्रश्नोत्तर-रत्नमालिकया ॥ १

भगवन् किमुपादेयम्
गुरुवचनं, हेयमपि किं अकार्यम् ।
को गुरुः अधिगततत्त्वः
शिष्यहितायोद्यतः सततम् ॥ २

त्वरितं किं कर्तव्यं विदुषाम्
संसारसन्ततिच्छेदः ।
किं मोक्षतरोर्बीजम्।
सम्यक् ज्ञानं क्रियासिद्धम् ॥ ३

कः पथ्यतरो धर्मः
कः शुचिरिह यस्य मानसं शुद्धम् ।
कः पण्डितो विवेकी
किं विषं अवधीरणा गुरुषु ॥ ४

किं संसारे सारम्
बहुशोऽपि विचिन्त्यमानमिदमेव ।
किं मनुजेश्विष्टतमं
स्वपरहितायोद्यतं जन्म ॥ ५

मदिरिव मोहजनकः
    कः स्नेहः के च दस्यवो विषयाः ।
का भववल्ली तृष्णा
    को वैरी यस्त्वनुद्योगः ॥ ६

कस्माद् भयमिह मरणात्
    अन्धातिह को विशिष्यते रागी ।
कः शूरो यो ललनालोचन-
    बाणैर्न च व्यथितः ॥ ७

पातुं कर्णाञ्जलिभिः
    किममृतमिह युज्यते सदुपदेशः ।
किं गुरुताया मूलम्
    यदेतदप्रार्थनं नाम ॥ ८

किं गहनं स्त्रीचरितं
    कश्चतुरो यो न खण्डितस्तेन ।
किं दुःखं असन्तोषः
    किं लाघवम् अधमतो याञ्चा ॥ ९

किं जीवितम् अनवद्यम्
    किं जाड्यम् पाठतोऽप्यनभ्यासः ।
को जागर्ति विवेकी
    का निद्रा मूढता जन्तोः ॥ १०

नलिनी-दल-गत-जलवत्तरलं किम्
यौवनं धनं चायुः ।
कथय पुनः के शशिनः किरणसमाः
सज्जना एव ॥ ११

को नरकः परवशता
किं सौख्यं सर्वसङ्गविरतिर्या ।
किं सत्यं भूतहितं
प्रियं च किं प्राणिनां असवः ॥ १२

कोऽनर्थफलो मानः
का सुखदा साधुजनमैत्री ।
सर्वव्यसनविनाशे को दक्षः
सर्वथा त्यागी ॥ १३

किं मरणं मूर्खत्वम्
किं चानर्थं यदवसरे दत्तं ।
आमरणात् किं शल्यम्
प्रच्छन्नं यत्कृतं पापम् ॥ १४

कुत्र विधेयो यत्नो
विद्याभ्यासे सदौषधे दाने ।
अवधीरणा क्व कार्या
खल-परयोषित्-परधनेषु ॥ १५

काहर्निशमनुचिन्त्या
संसारासारता न तु प्रमदा ।
का प्रेयसी विधेया
करुणा दीनेषु सज्जने मैत्री ॥ १६

कण्ठगतैरप्यसुभिः
कस्य ह्यात्मा न शक्यते जेतुम् ।
मूर्खस्य शङ्कितस्य च
विषादिनो वा कृतघ्नस्य ॥ १७

कः साधुः सद्वृत्तः
कमधममाचक्षते त्वसद्वृत्तम् ।
केन जितं जगदेतत्
सत्यतितिक्षावता पुंसा ॥ १८

कस्मै नमांसि देवाः कुर्वन्ति
दया-प्रधानाय ।
कस्मादुद्वेगः स्यात्
संसारारण्यतः सुधियः ॥ १९

कस्य वशे प्राणिगणः
सत्यप्रिय-भाषिणो विनीतस्य ।
क्व स्थातव्यं न्याय्ये पथि
दृष्टादृष्टलाभाढ्ये ॥ २०

कोऽन्धो योऽकार्यरतः
को बधिरो यो हितानि न शृणोति ।
को मूको यः काले
प्रियाणि वक्तुं न जानाति ॥ २१

किं दानं अनाकांक्षम्
किं मित्रं यो निवारयति पापात्।
कोऽलङ्कारः शीलम्
किं वाचां मण्डनं सत्यम् ॥ २२

विद्युद्विलसित-चपलं किम्
दुर्जनसङ्गतिर्युवतयश्च ।
कुलशीलनिष्प्रकम्पाः के कलिकालेऽपि
सज्जना एव ॥ २३

चिन्तामणिरिव दुर्लभमिह किं
कथयामि तच्चतुर्भद्रम् ।
किं तद् वदन्ति भूयो
विधूततमसा विशेषेण ॥ २४

दानं प्रियवाक् सहितं
ज्ञानमगर्वं क्षमान्वितं शौर्यम् ।
वित्तं त्यागसमेतं
दुर्लभमेतच्चतुर्भद्रम् ॥ २५

किं शोच्यं कार्पण्यं
सति विभवे किं प्रशस्तम् औदार्यम् ।
कः पूज्यो विद्वद्भिः
स्वभावतः सर्वदा विनीतो यः ॥ २६

कः कुलकमलदिनेशः
सति गुणविभवेऽपि यो नम्रः ।
कस्य वशे जगदेतत्
प्रियहितवचनस्य धर्मनिरतस्य ॥ २७

विद्वन्मनोहरा का
सत्कविता बोधवनिता च ।
कं न स्पृशति विपत्तिः
प्रवृद्धवचनानुवर्तिनं दान्तम् ॥ २८

कस्मै स्पृहयति कमला
त्वनलसचित्ताय नीतिवृत्ताय ।
त्यजति च कं सहसा
द्विजगुरुसुरनिन्दाकरं च सालस्यम् ॥ २९

कुत्र विधेयो वासः
सज्जननिकटेऽथवा काश्याम् ।
कः परिहार्यो देशः
पिशुनयुतो लुब्धभूपश्च ॥ ३०

केनाशोच्यः पुरुषः
प्रणतकलत्रेण धीरविभवेन ।
इह भुवने कः शोच्यः
सत्यपि विभवे न यो दाता ॥ ३१

किं लघुताया मूलम्
प्राकृतपुरुषेषु या याञ्चा ।
रामादपि कः शूरः
स्मरशरनिहतो न यश्चलति ॥ ३२

किमहर्निशमनुचिन्त्यं
भगवच्चरणं न संसारः ।
चक्षुष्मन्तोऽप्यन्धाः
के स्युः ये नास्तिका मनुजाः ॥ ३३

कः पङ्गुरिह प्रथितो
व्रजति च यो वार्धके तीर्थम् ।
किं तीर्थमपि च मुख्यम्
चित्तमलं यन्निवर्तयति ॥ ३४

किं स्मर्तव्यं पुरुषैः हरि-
नाम सदा न यावनी भाषा ।
को हि न वाच्यः सुधिया
परदोषश्चानृतं तद्वत् ॥ ३५

किं संपाद्यं मनुजैः विद्या
वित्तं बलं यशः पुण्यम् ।
कः सर्वगुणविनाशी
लोभः शत्रुश्च कः कामः ॥ ३६

का च सभा परिहार्या
हीना या वृद्धसचिवेन ।
इह कुत्रावहितः स्यान्मनुजः
किल राजासेवायाम् ॥ ३७

प्राणादपि को रम्यः
कुलधर्मः साधुसङ्गश्च ।
का संरक्ष्या कीर्तिः
पतिव्रता नैजबुद्धिश्च ॥ ३८

का कल्पलता लोके
सच्छिष्यायार्पिता विद्या ।
कोऽक्षयवटवृक्षः स्यात्
विधिवत् सत्पात्रदत्तदानं यत् ॥ ३९

किं शस्त्रं सर्वेषां युक्तिः
माता च का धेनुः ।
किं नु बलं यद्धैर्यं को
मृत्युः यदवधानरहितत्वम् ॥ ४०

कुत्र विषं दुष्टजने किमिहाशौचम्
भवेत् ऋणं नृणाम् ।
किमभयमिह वैराग्यं भयमपि
किं वित्तमेव सर्वेषाम् ॥ ४१

का दुर्लभा नराणाम्
हरिभक्तिः पातकं च किं हिंसा ।
को हि भगवत् प्रियः स्यात्
योऽन्यं नोद्वेजयेदनुद्विग्नः ॥ ४२

कस्मात् सिद्धिः तपसः
बुद्धिः क्व नु भूसुरे कुतो बुद्धिः ।
वृद्धोपसेवया के
वृद्धा ये धर्मतत्त्वज्ञाः ॥ ४३

सम्भावितस्य मरणा-
दधिकं किं दुर्यशो भवति ।
लोके सुखी भवेत् को धनवान्
धनमपि च किं यतश्चेष्टम् ॥ ४४

सर्वसुखानां बीजम्
किं पुण्यं दुःखमपि कुतः पापात् ।
कस्यैश्वर्यं यः किल
शङ्करमाराधयेद् भक्त्या ॥ ४५

को वर्धते विनीतः
    को वा हीयेत यो दृप्तः ।
को न प्रत्येतव्यो
    ब्रूते यश्चानृतं शश्वत् ॥ ४६

कुत्रानृतेऽप्यपापम्
    यच्चोक्तं धर्मरक्षार्थम् ।
को धर्मो अभिमतो
    यः शिष्टानां निजकुलीनानाम्॥ ४७

साधुबलं किं दैवं
    कः साधुः सर्वदा तुष्टः ।
दैवं किं यत्सुकृतम्
    कः सुकृती श्लाघ्यते च यः सद्भिः॥ ४८

गृहमेधिनश्च मित्रं किं
    भार्या को गृही च यो यजते ।
को यज्ञो यः श्रुत्या
    विहितः श्रेयस्करो नृणाम् ॥ ४९

कस्य क्रिया हि सफला
    यः पुनराचारवान् शिष्टः ।
कः शिष्टो यो वेद
    प्रमाणवान् को हतः क्रियाभ्रष्टः ॥ ५०

को धन्यः संन्यासी
को मान्यः पण्डितः साधुः ।
कः सेव्यो यो दाता
को दाता योऽर्थितृप्तिमातनुते ॥ ५१

किं भाग्यं देहवताम्
आरोग्यं कः फली कृषिकृत् ।
कस्य न पापं जपतः
कः पूर्णो यः प्रजावान् स्यात् ॥ ५२

किं दुष्करं नराणाम्
यन्मनसो निग्रहः सततम् ।
को ब्रह्मचर्यवान् स्यात्
यश्चास्खलितोर्ध्वरेतस्कः ॥ ५३

का च परदेवतोक्ता
चिच्छक्तिः को जगद् भर्ता ।
सूर्यः सर्वेषां को
जीवनहेतुः स पर्जन्यः ॥ ५४

कः शूरो यो भीत-
त्राता त्राता च कः सद्गुरुः ।
को हि जगद्गुरुरुक्तः
शम्भुः ज्ञानं कुतः शिवादेव ॥ ५५

मुक्ति लभेत कस्मात्
मुकुन्दभक्तेः मुकुन्दः कः ।
यस्तारयेदविद्यां
का चाविद्या यदात्मनोऽस्फूर्तिः ॥ ५६

कस्य न शोको यः स्या-
दक्रोधः किं सुखं तुष्टिः ।
को राजा रञ्जनकृत्
कश्च श्वा नीचसेवको यः स्यात् ॥ ५७

को मायी परमेशः
क इन्द्रजालायते प्रपञ्चोऽयम् ।
कः स्वप्ननिभो जाग्र-
द्व्यवहारः सत्यमपि च किं ब्रह्म ॥ ५८

किं मिथ्या यद्विद्या-
नाश्यं तुच्छं तु शशविषाणादि ।
का चानिर्वाच्या
माया किं कल्पितं द्वैतम् ॥ ५९

किं पारमार्थिकं स्यात्
अद्वैतं चाज्ञता कुतो अनादिः ।
वपुषश्च पोषकं किं
प्रारब्धं चान्नदायि किं चायुः ॥ ६०

को ब्राह्मणैरुपास्यो
गायत्र्यर्काग्निगोचरः शम्भुः ।
गायत्र्यामादित्ये चाग्नौ
शम्भौ च किं नु तत्तत्वम् ॥ ६१

प्रत्यक्षदेवता का
माता पूज्यो गुरुश्च कः तातः ।
कः सर्वदेवतात्मा
विद्याकर्मान्वितो विप्रः ॥ ६२

कश्च कुलक्षयहेतुः
सन्तापः सज्जनेषु योऽकारि ।
केषाममोघ वचनम्
ये च पुनः सत्यमौनशमशीलाः ॥ ६३

किं जन्म विषयसङ्गः
किमुत्तरं जन्म पुत्रः स्यात् ।
कोऽपरिहार्यो मृत्युः
कुत्र पदं विन्यसेच्च दृक्पूते ॥ ६४

पात्रं किमन्नदाने
क्षुधितं कोऽर्च्यो हि भगवदवतारः ।
कश्च भगवान् महेशः
शङ्करनारायणात्मैकः ॥ ६५

फलमपि भगवद्भक्तेः
 किं तल्लोकस्वरूपसाक्षात्त्वम् ।
मोक्षश्च को ह्यविद्यास्तमयः
 कः सर्ववेदभूः अथ च ओं ॥ ६६

इत्येषा कण्ठस्था
 प्रश्नोत्तररत्नमालिका येषाम् ।
ते मुक्ताभरणा इव
 विमलाश्चाभान्ति सत्समाजेषु ॥ ६७

इति श्रीशङ्कराचार्यविरचितं प्रश्नोत्तरमालिकास्तोत्रं सम्पूर्णम् ॥

